# shAkinIsadAshivastavanama NgalAShTottarasahasranAmastotra

# શાકિનીસદાશિવસ્તવનમઙ્ગલાષ્ટોત્તરસહસ્રનામસ્તોત્ર

## Document Information

Text title : shAkinIsadAshivasahasra

File name : shAkinIsadAshivasahasra.itx

Category : sahasranAma, devii, ShaTchakrashakti, stotra, devI, yoginI

Location : doc_devii

Author : Traditional

Transliterated by : Mark S.G. Dyczkowski muktAbodha

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : rudrayAmale uttaratantre bhairava bhairavI sa.nvAde

Latest update : May 25, 2009

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

shAkinIsadAshivastavanama NgalAShTottarasahasranAmastotra

# શાકિનીસદાશિવસ્તવનમઙ્ગલાષ્ટોત્તરસહસ્રનામસ્તોત્ર

શ્રીગણેશાય નમઃ ।
શ્રીઆનન્દભૈરવી ઉવાચ ।
કૈલાસશિખરારૂઢ પઞ્ચવક્ત્ર ત્રિલોચન ।
અભેદ્યભેદકપ્રાણવલ્લભ શ્રીસદાશિવ ॥ ૧ ॥

ભવપ્રાણપ્રરક્ષાય કાલકૂટહરાય ચ ।
પ્રત્યઙ્ગિરાપાદુકાય દાન્તં શબ્દમયં પ્રિયમ્ ॥ ૨ ॥

ઇચ્છામિ રક્ષણાર્થાય ભક્તાનાં યોગિનાં સદામ્ ।
અવશ્યં કથયામ્યત્ર સર્વમઙ્ગલલક્ષણમ્ ॥ ૩ ॥

અષ્ટોત્તરસહસ્રાખ્યં સદાશિવસમન્વિતમ્ ।
મહાપ્રભાવજનનં દમનં દુષ્ટચેતસામ્ ॥ ૪ ॥

સર્વરક્ષાકરં લોકે કણ્ઠપદ્મપ્રસિદ્ધયે ।
અકાલમૃત્યુહરણં સર્વવ્યાધિનિવારણમ્ ॥ ૫ ॥

યોગસિદ્ધિકરં સાક્ષાદ્ અમૃતાનન્દકારકમ્ ।
વિષજ્વાલાદિહરણં મન્ત્રસિદ્ધિકરં પરમ્ ॥ ૬ ॥

નામ્નાં સ્મરણમાત્રેણ યોગિનાં વલ્લભો ભવેત્ ।
સદાશિવયુતાં દેવીં સમ્પૂજ્ય સંસ્મરેદ્ યદિ ॥ ૭ ॥

માસાન્તે સિદ્ધિમાપ્નોતિ ખેચરીમેલનં ભવેત્ ।
આકાશગામિનીસિદ્ધિઃ પઠિત્વા લભ્યતે ધ્રુવમ્ ॥ ૮ ॥

ધનં રત્નં ક્રિયાસિદ્ધિં વિભૂતિસિદ્ધિમાં લભેત્ ।
પઠનાદ્ ધારણાદ્યોગી મહાદેવઃ સદાશિવઃ ॥ ૯ ॥

વિષ્ણુશ્ચક્રધરઃ સાક્ષાદ્ બ્રહ્મા નિત્યં તપોધનઃ ।
યોગિનઃ સર્વદેવાશ્ચ મુનયશ્ચાપિ યોગિનઃ ॥ ૧૦ ॥

સિદ્ધાઃ સર્વે સઞ્ચરન્તિ ધૃત્વા ચ પઠનાદ્ યતઃ ।
યે યે પઠન્તિ નિત્યં તુ તે સિદ્ધા વિષ્ણુસમ્ભવાઃ ॥ ૧૧ ॥

કિમન્યત્ કથનેનાપિ ભુક્તિં મુક્તિં ક્ષણાલ્લભેત્ ॥ ૧૨ ॥

અસ્ય શ્રીભુવનમઙ્ગલમહાસ્તોત્રાષ્ટોત્તરસહસ્રનામ્નઃ ,
શ્રીસદાશિવઋષિઃ , ગાયત્રીચ્છન્દઃ , શ્રીસદાશિવશાકિનીદેવતા ,
પુરુષાર્થાષ્ટસિદ્ધિસમયયોગસમૃદ્ધયે વિનિયોગઃ ।
ૐ શાકિની પીતવસ્ત્રા સદાશિવ ઉમાપતિઃ ।
શાકમ્ભરી મહાદેવી ભવાની ભુવનપ્રિયઃ ॥ ૧૩ ॥

યોગિની યોગધર્માત્મા યોગાત્મા શ્રીસદાશિવઃ ।
યુગાદ્યા યુગધર્મા ચ યોગવિદ્યા સુયોગિરાટ્ ॥ ૧૪ ॥

યોગિની યોગજેતાખ્યઃ સુયોગા યોગશઙ્કરઃ ।
યોગપ્રિયા યોગવિદ્વાન્ યોગદા યોગષડ્ભુવિઃ ॥ ૧૫ ॥

ત્રિયોગા જગદીશાત્મા જાપિકા જપસિદ્ધિદઃ ।
યત્ની યત્નપ્રિયાનન્દો વિધિજ્ઞા વેદસારવિત્ ॥ ૧૬ ॥

સુપ્રતિષ્ઠા શુભકરો મદિરા મદનપ્રિયઃ ।
મધુવિદ્યા માધવીશઃ ક્ષિતિઃ ક્ષોભવિનાશનઃ ॥ ૧૭ ॥

વીતિજ્ઞા મન્મથઘ્નશ્ચ ચમરી ચારુલોચનઃ ।
એકાન્તરા કલ્પતરુઃ ક્ષમાબુદ્ધો રમાસવઃ ॥ ૧૮ ॥

વસુન્ધરા વામદેવઃ શ્રીવિદ્યા મન્દરસ્થિતઃ ।
અકલઙ્કા નિરાતઙ્કઃ ઉતઙ્કા શઙ્કરાશ્રયઃ ॥ ૧૯ ॥

નિરાકારા નિર્વિકલ્પો રસદા રસિકાશ્રયઃ ।
રામા રામનનાથશ્ચ લક્ષ્મી નીલેષુલોચનઃ ॥ ૨૦ ॥

વિદ્યાધરી ધરાનન્દઃ કનકા કાઞ્ચનાઙ્ગધૃક્ ।
શુભા શુભકરોન્મત્તઃ પ્રચણ્ડા ચણ્ડવિક્રમઃ ॥ ૨૧ ॥

સુશીલા દેવજનકઃ કાકિની કમલાનનઃ ।
કજ્જલાભા કૃષ્ણદેહઃ શૂલિની ખડ્ગચર્મધૃક્ ॥ ૨૨ ॥

ગતિગ્રાહ્યઃ પ્રભાગૌરઃ ક્ષમા ક્ષુબ્ધઃ શિવા શિવઃ ।
જવા યતિઃ પરા હરિર્હરાહરોઽક્ષરાક્ષરઃ ॥ ૨૩ ॥

સનાતની સનાતનઃ શ્મશાનવાસિનીપતિઃ ।
જયાક્ષયો ધરાચરઃ સમાગતિઃ પ્રમાપતિઃ ॥ ૨૪ ॥

કુલાકુલો મલાનનો વલીવલા મલામલઃ ।
પ્રભાધરઃ પરાપરઃ સરાસરઃ કરાકરઃ ॥ ૨૫ ॥

મયામયઃ પયાપયઃ પલાપલો દયાદયઃ ।
ભયાભયો જયાજયો ગયાગયઃ ફલાન્વયઃ ॥ ૨૬ ॥

સમાગમો ધમાધમો રમારમો વમાવમઃ ।
વરાઙ્ગણા ધરાધરઃ પ્રભાકરો ભ્રમાભ્રમઃ ॥ ૨૭ ॥

સતી સુખી સુલક્ષણા કૃપાકરો દયાનિધિઃ ।
ધરાપતિઃ પ્રિયાપતિર્વીરાગિણી મનોન્મનઃ ॥ ૨૮ ॥

પ્રધાવિની સદાચલઃ પ્રચઞ્ચલાતિચઞ્ચલઃ ।
કટુપ્રિયા મહાકટુઃ પટુપ્રિયા મહાપટુઃ ॥ ૨૯ ॥

ધનાવલી ગણાગણી ખરાખરઃ ફણિઃ ક્ષણઃ ।
પ્રિયાન્વિતા શિરોમણિસ્તુ શાકિની સદાશિવઃ ॥ ૩૦ ॥

રુણારુણો ઘનાઘનો હયી હયો લયી લયઃ ।
સુદન્તરા સુદાગમઃ ખલાપહા મહાશયઃ ॥ ૩૧ ॥

ચલત્કુચા જવાવૃતો ઘનાન્તરા સ્વરાન્તકઃ ।
પ્રચણ્ડઘર્ઘરધ્વનિઃ પ્રિયા પ્રતાપવહ્નિગઃ ॥ ૩૨ ॥

પ્રશાન્તિરુન્દુરુસ્થિતા મહેશ્વરી મહેશ્વરઃ ।
મહાશિવાવિની ધની રણેશ્વરી રણેશ્વરઃ ॥ ૩૩ ॥

પ્રતાપિની પ્રતાપનઃ પ્રમાણિકા પ્રમાણવિત્ ।
વિશુદ્ધવાસિની મુનિવિશુદ્ધવિન્મધૂત્તમા ॥ ૩૪ ॥

તિલોત્તમા મહોત્તમઃ સદામયા દયામયઃ ।
વિકારતારિણી તરુઃ સુરાસુરોઽમરાગુરુઃ ॥ ૩૫ ॥

પ્રકાશિકા પ્રકાશકઃ પ્રચણ્ડિકા વિભાણ્ડકઃ ।
ત્રિશૂલિની ગદાધરઃ પ્રવાલિકા મહાબલઃ ॥ ૩૬ ॥

ક્રિયાવતી જરાપતિઃ પ્રભામ્બરા દિગમ્બરઃ ।
કુલામ્બરા મૃગામ્બરા નિરન્તરા જરાન્તરઃ ॥ ૩૭ ॥

શ્મશાનનિલયા શમ્ભુર્ભવાની ભીમલોચનઃ ।
કૃતાન્તહારિણીકાન્તઃ કુપિતા કામનાશનઃ ॥ ૩૮ ॥

ચતુર્ભુજા પદ્મનેત્રો દશહસ્તા મહાગુરુઃ ।
દશાનના દશગ્રીવઃ ક્ષિપ્રાક્ષી ક્ષેપનપ્રિયઃ ॥ ૩૯ ॥

વારાણસી પીઠવાસી કાશી વિશ્વગુરુપ્રિયઃ ।
કપાલિની મહાકાલઃ કાલિકા કલિપાવનઃ ॥ ૪૦ ॥

રન્ધ્રવર્ત્મસ્થિતા વાગ્મી રતી રામગુરુપ્રભુઃ ।
સુલક્ષ્મીઃ પ્રાન્તરસ્થશ્ચ યોગિકન્યા કૃતાન્તકઃ ॥ ૪૧ ॥

સુરાન્તકા પુણ્યદાતા તારિણી તરુણપ્રિયઃ ।
મહાભયતરા તારાસ્તારિકા તારકપ્રભુઃ ॥ ૪૨ ॥

તારકબ્રહ્મજનની મહાદૃપ્તઃ ભવાગ્રજઃ ।
લિઙ્ગગમ્યા લિઙ્ગરૂપી ચણ્ડિકા વૃષવાહનઃ ॥ ૪૩ ॥

રુદ્રાણી રુદ્રદેવશ્ચ કામજા કામમન્થનઃ ।
વિજાતીયા જાતિતાતો વિધાત્રી ધાતૃપોષકઃ ॥ ૪૪ ॥

નિરાકારા મહાકાશઃ સુપ્રવિદ્યા વિભાવસુઃ ।
વાસુકી પતિતત્રાતા ત્રિવેણી તત્ત્વદર્શકઃ ॥ ૪૫ ॥

પતાકા પદ્મવાસી ચ ત્રિવાર્તા કીર્તિવર્ધનઃ ।
ધરણી ધારણાવ્યાપ્તો વિમલાનન્દવર્ધનઃ ॥ ૪૬ ॥

વિપ્રચિત્તા કુણ્ડકારી વિરજા કાલકમ્પનઃ ।
સૂક્ષ્માધારા અતિજ્ઞાની મન્ત્રસિદ્ધિઃ પ્રમાણગઃ ॥ ૪૭ ॥

વાચ્યા વારણતુણ્ડશ્ચ કમલા કૃષ્ણસેવકઃ ।
દુન્દુભિસ્થા વાદ્યભાણ્ડો નીલાઙ્ગી વારણાશ્રયઃ ॥ ૪૮ ॥

વસન્તાદ્યા શીતરશ્મિઃ પ્રમાદ્યા શક્તિવલ્લભઃ ।
ખડ્ગના ચક્રકુન્તાઢ્યઃ શિશિરાલ્પધનપ્રિયઃ ॥ ૪૯ ॥

દુર્વાચ્યા મન્ત્રનિલયઃ ખણ્ડકાલી કુલાશ્રયઃ ।
વાનરી હસ્તિહારાદ્યઃ પ્રણયા લિઙ્ગપૂજકઃ ॥ ૫૦ ॥

માનુષી મનુરૂપશ્ચ નીલવર્ણા વિદ્યુપ્રભઃ ।

અર્ધશ્ચન્દ્રધરા કાલઃ કમલા દીર્ઘકેશધૃક્ ॥ ૫૧ ॥

દીર્ઘકેશી વિશ્વકેશી ત્રિવર્ગા ખણ્ડનિર્ણયઃ ।
ગૃહિણી ગ્રહહર્તા ચ ગ્રહપીડા ગ્રહક્ષયઃ ॥ ૫૨ ॥

પુષ્પગન્ધા વારિચરઃ ક્રોધાદેવી દિવાકરઃ ।
અઞ્જના ક્રૂરહર્તા ચ કેવલા કાતરપ્રિયઃ ॥ ૫૩ ॥

પદ્યામયી પાપહર્તા વિદ્યાદ્યા શૈલમર્દકઃ ।
કૃષ્ણજિહ્વા રક્તમુખો ભુવનેશી પરાત્પરઃ ॥ ૫૪ ॥

વદરી મૂલસમ્પર્કઃ ક્ષેત્રપાલા બલાનલઃ ।
પિતૃભૂમિસ્થિતાચાર્યો વિષયા બાદરાયણિઃ ॥ ૫૫ ॥

પુરોગમા પુરોગામી વીરગા રિપુનાશકઃ ।
મહામાયા મહાન્માયો વરદઃ કામદાન્તકઃ ॥ ૫૬ ॥

પશુલક્ષ્મીઃ પશુપતિઃ પઞ્ચશક્તિઃ ક્ષપાન્તકઃ ।
વ્યાપિકા વિજયાચ્છન્નો વિજાતીયા વરાનનઃ ॥ ૫૭ ॥

કટુમૂતીઃ શાકમૂતીસ્ત્રિપુરા પદ્મગર્ભજઃ ।
અજાબ્યા જારકઃ પ્રક્ષ્યા વાતુલઃ ક્ષેત્રબાન્ધવા ॥ ૫૮ ॥

અનન્તાનન્તરૂપસ્થો લાવણ્યસ્થા પ્રસઞ્ચયઃ ।
યોગજ્ઞો જ્ઞાનચક્રેશો બભ્રમા ભ્રમણસ્થિતઃ ॥ ૫૯ ॥

શિશુપાલા ભૂતનાશો ભૂતકૃત્યા કુટુમ્બપઃ ।
તૃપ્તાશ્વત્થો વરારોહા વટુકઃ પ્રોટિકાવશઃ ॥ ૬૦ ॥

શ્રદ્ધા શ્રદ્ધાન્વિતઃ પુષ્ટિઃ પુષ્ટો રુષ્ટાષ્ટમાધવા ।
મિલિતા મેલનઃ પૃથ્વી તત્ત્વજ્ઞાની ચારુપ્રિયા ॥ ૬૧ ॥

અલબ્ધા ભયહન્ત્યા દશનઃ પ્રાપ્તમાનસા ।
જીવની પરમાનન્દો વિદ્યાઢ્યા ધર્મકર્મજઃ ॥ ૬૨ ॥

અપવાદરતાકાઙ્ક્ષી વિલ્વાનાભદ્રકમ્બલઃ ।
શિવિવારાહનોન્મત્તો વિશાલાક્ષી પરન્તપઃ ॥ ૬૩ ॥

ગોપનીયા સુગોપ્તા ચ પાર્વતી પરમેશ્વરઃ ।
શ્રીમાતઙ્ગી ત્રિપીઠસ્થો વિકારી ધ્યાનનિર્મલઃ ॥ ૬૪ ॥

ચાતુરી ચતુરાનન્દઃ પુત્રિણી સુતવત્સલઃ ।
વામની વિષયાનન્દઃ કિઙ્કુરી ક્રોધજીવનઃ ॥ ૬૫ ॥

ચન્દ્રાનના પ્રિયાનન્દઃ કુશલા કેતકીપ્રિયઃ ।
પ્રચલા તારકજ્ઞાની ત્રિકર્મા નર્મદાપતિઃ ॥ ૬૬ ॥

કપાટસ્થા કલાપસ્થો વિદ્યાજ્ઞા વર્ધમાનગઃ ।
ત્રિકૂટા ત્રિવિધાનન્દો નન્દના નન્દનપ્રિયઃ ॥ ૬૭ ॥

વિચિકિત્સા સમાસાઙ્ગો મન્ત્રજ્ઞા મનુવર્ધનઃ ।
મન્ત્રિકા ચામ્બિકાનાથો વિવાશી વંશવર્ધનઃ ॥ ૬૮ ॥

વજ્રજિહ્વા વજ્રદન્તો વિક્રિયા ક્ષેત્રપાલનઃ ।
વિકારણી પાર્વતીશઃ પ્રિયાઙ્ગી પઞ્ચચામરઃ ॥ ૬૯ ॥

આંશિકા વામદેવાદ્યા વિમાયાઢ્યા પરાપરઃ ।
પાયાઙ્ગી પરમૈશ્વર્યા દાતા ભોક્ત્રી દિવાકરઃ ॥ ૭૦ ॥

કામદાત્રી વિચિત્રાક્ષો રિપુરક્ષા ક્ષપાન્તકૃત્ ।
ઘોરમુખી ઘર્ઘરાખ્યો વિલજ્વા જ્વાલિનીપતિઃ ॥ ૭૧ ॥

જ્વાલામુખી ધર્મકર્તા શ્રીકર્ત્રી કારણાત્મકઃ ।
મુણ્ડાલી પઞ્ચચૂડાશ્ચ ત્રિશાવર્ણા સ્થિતાગ્રજઃ ॥ ૭૨ ॥

વિરૂપાક્ષી બૃહદ્ગર્ભો રાકિની શ્રીપિતામહઃ ।
વૈષ્ણવી વિષ્ણુભક્તશ્ચ ડાકિની ડિણ્ડિમપ્રિયઃ ॥ ૭૩ ॥

રતિવિદ્યા રામનાથો રાધિકા વિષ્ણુલક્ષણઃ ।
ચતુર્ભુજા વેદહસ્તો લાકિની મીનકુન્તલઃ ॥ ૭૪ ॥

મૂર્ધજા લાઙ્ગલીદેવઃ સ્થવિરા જીર્ણવિગ્રહઃ ।
લાકિનીશા લાકિનીશઃ પ્રિયાખ્યા ચારુવાહનઃ ॥ ૭૫ ॥

જટિલા ત્રિજટાધારી ચતુરાઙ્ગી ચરાચરઃ ।
ત્રિશ્રોતા પાર્વતીનાથો ભુવનેશી નરેશ્વરઃ ॥ ૭૬ ॥

પિનાકિની પિનાકી ચ ચન્દ્રચૂડા વિચારવિત્ ।
જાડ્યહન્ત્રી જડાત્મા ચ જિહ્વાયુક્તો જરામરઃ ॥ ૭૭ ॥

અનાહતાખ્યા રાજેન્દ્રઃ કાકિની સાત્ત્વિકસ્થિતઃ ।
મરુન્મૂર્તિ પદ્મહસ્તો વિશુદ્ધા શુદ્ધવાહનઃ ॥ ૭૮ ॥

વૃષલી વૃષપૃષ્ઠસ્થો વિભોગા ભોગવર્ધનઃ ।
યૌવનસ્થા યુવાસાક્ષી લોકાદ્યા લોકસાક્ષિણી ॥ ૭૯ ॥

બગલા ચન્દ્રચૂડાખ્યો ભૈરવી મત્તભૈરવઃ ।
ક્રોધાધિપા વજ્રધારી ઇન્દ્રાણી વહ્નિવલ્લભઃ ॥ ૮૦ ॥

નિર્વિકારા સૂત્રધારી મત્તપાના દિવાશ્રયઃ ।
શબ્દગર્ભા શબ્દમયો વાસવા વાસવાનુજઃ ॥ ૮૧ ॥

દિક્પાલા ગ્રહનાથશ્ચ ઈશાની નરવાહનઃ ।
યક્ષિણીશા ભૂતિનીશો વિભૂતિર્ભૂતિવર્ધનઃ ॥ ૮૨ ॥

જયાવતી કાલકારી કલ્પ્યવિદ્યા વિધાનવિત્ ।
લજ્જાતીતા લક્ષણાઙ્ગો વિષપાયી મદાશ્રયઃ ॥ ૮૩ ॥

વિદેશિની વિદેશસ્થોઽપાપા પાપવર્જિતઃ ।
અતિક્ષોભા કલાતીતો નિરિન્દ્રિયગણોદયા ॥ ૮૪ ॥

વાચાલો વચનગ્રન્થિમન્દરો વેદમન્દિરા ।
પઞ્ચમઃ પઞ્ચમીદુર્ગો દુર્ગા દુર્ગતિનાશનઃ ॥ ૮૫ ॥

દુર્ગન્ધા ગન્ધરાજશ્ચ સુગન્ધા ગન્ધચાલનઃ ।
ચાર્વઙ્ગી ચર્વણપ્રીતો વિશઙ્કા મરલારવિત્ ॥ ૮૬ ॥

અતિથિસ્થા સ્થાવરાદ્યા જપસ્થા જપમાલિની ।
વસુન્ધરસુતા તાર્ક્ષી તાર્કીકઃ પ્રાણતાર્કીકઃ ॥ ૮૭ ॥

તાલવૃક્ષાવૃતોન્નાસા તાલજાયા જટાધરઃ ।
જટિલેશી જટાધારી સપ્તમીશઃ પ્રસપ્તમી ॥ ૮૮ ॥

અષ્ટમીવેશકૃત્ કાલી સર્વઃ સર્વેશ્વરીશ્વરઃ ।
શત્રુહન્ત્રી નિત્યમન્ત્રી તરુણી તારકાશ્રયઃ ॥ ૮૯ ॥

ધર્મગુપ્તિઃ સારગુપ્તો મનોયોગા વિષાપહઃ ।
વજ્રાવીરઃ સુરાસૌરી ચન્દ્રિકા ચન્દ્રશેખરઃ ॥ ૯૦ ॥

વિટપીન્દ્રા વટસ્થાની ભદ્રપાલઃ કુલેશ્વરઃ ।
ચાતકાદ્યા ચન્દ્રદેહઃ પ્રિયાભાર્યા મનોયવઃ ॥ ૯૧ ॥

તીર્થપુણ્યા તીર્થયોગી જલજા જલશાયકઃ ।

ભૂતેશ્વરપ્રિયાભૂતો ભગમાલા ભગાનનઃ ॥ ૯૨ ॥

ભગિની ભગવાન્ ભોગ્યા ભવતી ભીમલોચનઃ ।
ભૃગુપુત્રી ભાર્ગવેશઃ પ્રલયાલયકારણઃ ॥ ૯૩ ॥

રુદ્રાણી રુદ્રગણપો રૌદ્રાક્ષી ક્ષીણવાહનઃ ।
કુમ્ભાન્તકા નિકુમ્ભારિઃ કુમ્ભાન્તી કુમ્ભિનીરગઃ ॥ ૯૪ ॥

કૂષ્માણ્ડી ધનરત્નાઢ્યો મહોગ્રાગ્રાહકઃ શુભા ।
શિવિરસ્થા શિવાનન્દઃ શવાસનકૃતાસની ॥ ૯૫ ॥

પ્રશંસા સમનઃ પ્રાજ્ઞા વિભાવ્યા ભવ્યલોચનઃ ।
કુરુવિદ્યા કૌરવંશઃ કુલકન્યા મૃણાલધૃક્ ॥ ૯૬ ॥

દ્વિદલસ્થા પરાનન્દો નન્દિસેવ્યા બૃહન્નલા ।
વ્યાસસેવ્યા વ્યાસપૂજ્યો ધરણી ધીરલોચનઃ ॥ ૯૭ ॥

ત્રિવિધારણ્યા તુલાકોટિઃ કાર્પાસા ખાર્પરાઙ્ગધૃક્ ।
વશિષ્ઠારાધિતાવિષ્ટો વશગા વશજીવનઃ ॥ ૯૮ ॥

ખડ્ગહસ્તા ખડ્ગધારી શૂલહસ્તા વિભાકરઃ ।
અતુલા તુલનાહીનો વિવિધા ધ્યાનનિર્ણયઃ ॥ ૯૯ ॥

અપ્રકાશ્યા વિશોધ્યશ્ચ ચામુણ્ડા ચણ્ડવાહનઃ ।
ગિરિજા ગાયનોન્મત્તો મલામાલી ચલાધમઃ ॥ ૧૦૦ ॥

પિઙ્ગદેહા પિઙ્ગકેશોડસમર્થા શીલવાહનઃ ।
ગારુડી ગરુડાનન્દો વિશોકા વંશવર્ધનઃ ॥ ૧૦૧ ॥

વેણીન્દ્રા ચાતકપ્રાયો વિદ્યાદ્યા દોષમર્દકઃ ।
અટ્ટહાસા અટ્ટહાસો મધુભક્ષા મધુવ્રતઃ ॥ ૧૦૨ ॥

મધુરાનન્દસમ્પન્ના માધવો મધુનાશિકા ।
માકરી મકરપ્રેમો માઘસ્થા મઘવાહનઃ ॥ ૧૦૩ ॥

વિશાખા સુસખા સૂક્ષ્મા જ્યેષ્ઠો જ્યેષ્ઠજનપ્રિયા ।
આષાઢનિલયાષાઢો મિથિલા મૈથિલીશ્વરઃ ॥ ૧૦૪ ॥

શીતશૈત્યગતો વાણી વિમલાલક્ષણેશ્વરઃ ।
અકાર્યકાર્યજનકો ભદ્રા ભાદ્રપદીયકઃ ॥ ૧૦૫ ॥

પ્રવરા વરહંસાખ્યઃ પવશોભા પુરાણવિત્ ।
શ્રાવણી હરિનાથશ્ચ શ્રવણા શ્રવણાઙ્કુરઃ ॥ ૧૦૬ ॥

સુકર્ત્રી સાધનાધ્યક્ષો વિશોધ્યા શુદ્ધભાવનઃ ।
એકશેષા શશિધરો ધરાન્તઃ સ્થાવરાધરઃ ॥ ૧૦૭ ॥

ધર્મપુત્રી ધર્મમાત્રો વિજયા જયદાયકઃ ।
દાસરક્ષાદિ વિદશકલાપો વિધવાપતિઃ ॥ ૧૦૮ ॥

વિધવાધવલો ધૂર્તઃ ધૂર્તાઢ્યો ધૂર્તપાલિકા ।
શઙ્કુરઃ કામગામી ચ દેવલા દેવમાયિકા ॥ ૧૦૯ ॥

વિનાશો મન્દરાચ્છન્ના મન્દરસ્થો મહાદ્વયા ।
અતિપુત્રી ત્રિમુણ્ડી ચ મુણ્ડમાલા ત્રિચણ્ડિકા ॥ ૧૧૦ ॥

કર્કટીશઃ કોટરશ્ચ સિંહિકા સિંહવાહનઃ ।
નારસિંહી નૃસિંહશ્ચ નર્મદા જાહ્નવીપતિઃ ॥ ૧૧૧ ॥

ત્રિવિધસ્ત્રી ત્રિસર્ગાસ્ત્રો દિગમ્બરો દિગમ્બરી ।
મુઞ્ચાનો મઞ્ચભેદી ચ માલઞ્ચા ચઞ્ચલાગ્રજઃ ॥ ૧૧૨ ॥

કટુતુઙ્ગી વિકાશાત્મા ઋદ્ધિસ્પષ્ટાક્ષરોઽન્તરા ।
વિરિઞ્ચઃ પ્રભવાનન્દો નન્દિની મન્દરાદ્રિધૃક્ ॥ ૧૧૩ ॥

કાલિકાભા કાઞ્ચનાભો મદિરાધા મદોદયઃ ।
દ્રવિડસ્થા દાડિમસ્થો મજ્જાતીતા મરુદ્ગતિઃ ॥ ૧૧૪ ॥

ક્ષાન્તિપ્રજ્ઞો વિધિપ્રજ્ઞા વીતિજ્ઞોત્સુકનિશ્ચયા ।
અભાવો મલિનાકારા કારાગારા વિચારહા ॥ ૧૧૫ ॥

શબ્દઃ કટાહભેદાત્મા શિશુલોકપ્રપાલિકા ।
અતિવિસ્તારવદનો વિભવાનન્દમાનસા ॥ ૧૧૬ ॥

આકાશવસનોન્માદી મેપુરા માંસચર્વણઃ ।
અતિકાન્તા પ્રશાન્તાત્મા નિત્યગુહ્યા ગભીરગઃ ॥ ૧૧૭ ॥

ત્રિગમ્ભીરા તત્ત્વવાસી રાક્ષસી પૂતનાક્ષરઃ ।
અભોગગણિકા હસ્તી ગણેશજનનીશ્વરઃ ॥ ૧૧૮ ॥

કુણ્ડપાલકકર્તા ચ ત્રિરૂણ્ડા રુણ્ડભાલધૃક્ ।
અતિશક્તા વિશક્તાત્મા દેવ્યાઙ્ગી નન્દનાશ્રયઃ ॥ ૧૧૯ ॥

ભાવનીયા ભ્રાન્તિહરઃ કાપિલાભા મનોહરઃ ।
આર્યદેવી નીલવર્ણા સાયકો બલવીર્યદા ॥ ૧૨૦ ॥

સુખદો મોક્ષદદાતાઽતો જનની વાઞ્છિતપ્રદઃ ।
ચાતિરૂપા વિરૂપસ્થો વાચ્યા વાચ્યવિવર્જિતઃ ॥ ૧૨૧ ॥

મહાલિઙ્ગસમુત્પન્ના કાકભેરી નદસ્થિતઃ ।
આત્મારામકલાકાયઃ સિદ્ધિદાતા ગણેશ્વરી ॥ ૧૨૨ ॥

કલ્પદ્રુમઃ કલ્પલતા કુલવૃક્ષઃ કુલદ્રુમા ।
સુમના શ્રીગુરુમયી ગુરુમન્ત્રપ્રદાયકઃ ॥ ૧૨૩ ॥

અનન્તશયનાઽનન્તો જલેશી જહ્નજેશ્વરઃ ।
ગઙ્ગા ગઙ્ગાધરઃ શ્રીદા ભાસ્કરેશો મહાબલા ॥ ૧૨૪ ॥

ગુપ્તાક્ષરો વિધિરતા વિધાનપુરુષેશ્વરઃ ।
સિદ્ધકલઙ્કા કુણ્ડાલી વાગ્દેવઃ પઞ્ચદેવતા ॥ ૧૨૫ ॥

અલ્પાતીતા મનોહારી ત્રિવિધા તત્ત્વલોચના ।
અમાયાપતિર્ભૂભ્રાન્તિઃ પાઞ્ચજન્યધરોઽગ્રજા ॥ ૧૨૬ ॥

અતિતપ્તઃ કામતપ્તા માયામોહવિવર્જિતઃ ।
આર્યા પુત્રીશ્વરઃ સ્થાણુઃ કૃશાનુસ્થા જલાપ્લુતઃ ॥ ૧૨૭ ॥

વારુણી મદિરામત્તો માંસપ્રેમદિગમ્બરા ।
અન્તરસ્થો દેહસિદ્ધા કાલાનલસુરાદ્રિપઃ ॥ ૧૨૮ ॥

આકાશવાહિની દેવઃ કાકિનીશો દિગમ્બરી ।
કાકચઞ્ચુપુટમધુહરો ગગનમાબ્ધિપા ॥ ૧૨૯ ॥

મુદ્રાહારી મહામુદ્રા મીનપો મીનભક્ષિણી ।
શાકિની શિવનાથેશઃ કાકોર્ધ્વેશી સદાશિવઃ ॥ ૧૩૦ ॥

કમલા કણ્ઠકમલઃ સ્થાયુકઃ પ્રેમનાયિકા ।
મૃણાલમાલાધારી ચ મૃણાલમાલામાલિની ॥ ૧૩૧ ॥

અનાદિનિધના તારા દુર્ગતારા નિરક્ષરા ।
સર્વાક્ષરા સર્વવર્ણા સર્વમન્ત્રાક્ષમાલિકા ॥ ૧૩૨ ॥

આનન્દભૈરવો નીલકણ્ઠો બ્રહ્માણ્ડમણ્ડિતઃ ।

શિવો વિશ્વેશ્વરોઽનન્તઃ સર્વાતીતો નિરઞ્જનઃ ॥ ૧૩૩ ॥

ઇતિ તે કથિતં નાથ ત્રૈલોક્યસારમઙ્ગલમ્ ।
ભુવનમઙ્ગલં નામ મહાપાતકનાશનમ્ ॥ ૧૩૪ ॥

અસ્ય પ્રપઠનેઽપિ ચ યત્ફલં લભતે નરઃ ।
તત્સર્વં કથિતું નાલં કોટિવર્ષશતૈરપિ ॥ ૧૩૫ ॥

તથાપિ તવ યત્નેન ફલં શ‌ૃણુ દયાર્ણવ ।
રાજદ્વારે નદીતીરે સઙ્ગ્રામે વિજનેઽનલે ॥ ૧૩૬ ॥

શૂન્યાગારે નિર્જને વા ઘોરાન્ધકારરાત્રિકે ।
ચતુષ્ટયે શ્મશાને વા પઠિત્વા ષોડશે દલે ॥ ૧૩૭ ॥

રક્તામ્ભોજૈઃ પૂજયિત્વા મનસા કામચિન્તયન્ ।
ઘૃતાક્તૈર્જુહુયાન્નિત્યં નામ પ્રત્યેકમુચ્ચરન્ ॥ ૧૩૮ ॥

મૂલમન્ત્રેણ પુટિતમાજ્યં વહ્નૌ સમર્પયેત્ ।
અન્તરે સ્વસુખે હોમઃ સર્વસિદ્ધિસુખપ્રદઃ ॥ ૧૩૯ ॥

સદ્યોમધુયુતૈર્માંસૈઃ સુસુખે મન્ત્રમુચ્ચરન્ ।
પ્રત્યેકં નામપુટિતં હુત્વા પુનર્મુખામ્બુજે ॥ ૧૪૦ ॥

કુણ્ડલીરસજિહ્વાયાં જીવન્મુક્તો ભવેન્નરઃ ।
ધૃત્વા વાપિ પઠિત્વા વા સ્તુત્વા વા વિધિના પ્રભો ॥ ૧૪૧ ॥

મહારુદ્રો ભવેત્સાક્ષાન્મમ દેહાન્વિતો ભવેત્ ।
યોગી જ્ઞાની ભવેત્ સિદ્ધઃ સારસઙ્કેતદર્શકઃ ॥ ૧૪૨ ॥

અપરાજિતઃ સર્વલોકે કિમન્યત્ ફલસાધનમ્ ।
ધૃત્વા રાજત્વમાપ્નોતિ કણ્ઠે પૃથ્વીશ્વરો ભવેત્ ॥ ૧૪૩ ॥

દક્ષહસ્તે તથા ધૃત્વા ધનવાન્ ગુણવાન્ ભવેત્ ।
અકાલમૃત્યુહરણં સર્વવ્યાધિનિવારણમ્ ॥ ૧૪૪ ॥

હુત્વા રાજેન્દ્રનાથશ્ચ મહાવાગ્મી સદાઽભયઃ ।
સર્વેષાં મથનં કૃત્વા ગણેશો મમ કાર્તીકઃ ॥ ૧૪૫ ॥

દેવનામધિપો ભૂત્વા સર્વજ્ઞો ભવતિ પ્રભો ।
યથા તથા મહાયોગી ભ્રમત્યેવ ન સંશયઃ ॥ ૧૪૬ ॥

પ્રાતઃકાલે પઠેદ્ યસ્તુ મસ્તકે સ્તુતિધારકઃ ।
જલસ્તમ્ભં કરોત્યેવ રસસ્તમ્ભં તથૈવ ચ ॥ ૧૪૭ ॥

રાજ્યસ્તમ્ભં નરસ્તમ્ભં વીર્યસ્તમ્ભં તથૈવ ચ
વિદ્યાસ્તમ્ભં સુખસ્તમ્ભં ક્ષેત્રસ્તમ્ભં તથૈવ ચ ॥ ૧૪૮ ॥

રાજસ્તમ્ભં ધનસ્તમ્ભં ગ્રામસ્તમ્ભં તથૈવ ચ
મધ્યાહ્ને ચ પઠેદ્ યસ્તુ વહ્નિસ્તમ્ભં કરોત્યપિ ॥ ૧૪૯ ॥

કાલસ્તમ્ભં વયઃસ્તમ્ભં શ્વાસસ્તમ્ભં તથૈવ ચ ।
રસસ્તમ્ભં વાયુસ્તમ્ભં બાહુસ્તમ્ભં કરોત્યપિ ॥ ૧૫૦ ॥

સાયાહ્ને ચ પઠેદ્ યસ્તુ કણ્ઠોદરે ચ ધારયન્ ।
મન્ત્રસ્તમ્ભં શિલાસ્તમ્ભં શાસ્ત્રસ્તમ્ભં કરોત્યપિ ॥ ૧૫૧ ॥

હિરણ્યરજતસ્તમ્ભં વજ્રસ્તમ્ભં તથૈવ ચ ।
અકાલત્વાદિસંસ્તમ્ભં વાતસ્તમ્ભં કરોત્યપિ ॥ ૧૫૨ ॥

પારદસ્તમ્ભનં શિલ્પકલ્પના જ્ઞાનસ્તમ્ભનમ્ ।
આસનસ્તમ્ભનં વ્યાધિસ્તમ્ભનં બન્ધનં રિપોઃ ॥ ૧૫૩ ॥

ષટ્પદ્મસ્તમ્ભનં કૃત્વા યોગી ભવતિ નિશ્ચિતમ્ ।
વન્ધ્યા નારી લભેત્ પુત્રં સુન્દરં સુમનોહરમ્ ॥ ૧૫૪ ॥

ભ્રષ્ટો મનુષ્યો રાજેન્દ્રઃ કિમન્યે સાધવો જનાઃ ।
શ્રવણાન્મકરે લગ્ને ચિત્રાયોગે ચ પર્વણિ ॥ ૧૫૫ ॥

હિરણ્યયોગે વાયવ્યાં લિખિત્વા માઘમાસકે ।
વૈશાખે રાજયોગે વા રોહિણ્યાખ્યા વિશેષતઃ ॥ ૧૫૬ ॥

શ્રીમદ્ભુવનમઙ્ગલં નામ યશોદાતૃ ભવેદ્ ધ્રુવમ્ ।
જાયન્તે રાજવલ્લભા અમરાઃ ખેચરા લિખનેન ॥ ૧૫૭ ॥

ધર્માર્થકામમોક્ષં ચ પ્રાપ્નુવન્તિ ચ પાઠકાઃ ।
કીર્તિરાત્મદૃષ્ટિપાતં લભતે નાત્ર સંશયઃ ॥ ૧૫૮ ॥

॥ ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે ભૈરવીભૈરવસંવાદે
શાકિનીસદાશિવસ્તવનમઙ્ગલાષ્ટોત્તરસહસ્રનામ સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*shAkinIsadAshivastavanama NgalAShTottarasahasranAmastotra*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*